International Journal of Sanskrit Research 2015; 1(6): 34-36

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(6): 34-36
© 2015 IJSR
www.sanskritjournal.com
Received: 17-07-2015
Accepted: 19-08-2015

डॉ. परमेश्वर साहु
पत्रालय तमुरिया, जिला-मधुबनी,
बिहार, भारत

Corresponding Author:
डॉ. परमेश्वर साहु
पत्रालय तमुरिया, जिला-मधुबनी,
बिहार, भारत

# शाब्दिकमने स्फोटतत्त्वम्- विमर्शः

**डॉ. परमेश्वर साहु**

**प्रस्तावना**

स्फोटः शब्दतत्त्वम्। स्फोटविवेकस्योद्गमः शब्दशास्त्रम्।अस्य प्रथमे विवेचका वैयाकरणा इति ध्वनिसिद्धान्तप्रतिष्ठापकेन काव्यशास्त्रीयचार्येणानन्दवर्द्धने न ध्वन्यालोके ध्वनिकारिकाया वृत्तै, तदनुयायिना अभिनवगुप्तेन तसया लोचनटीकायाम्, तयोरनुयायिना मम्मटभट्टेन न उत्तमकाव्य (ध्वनिकाव्य) निरूपणकारिकाया वृत्तो- प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्' इत्पाद्युक्तवता स्पष्टतः स्वीकृतमेव।

शब्दशास्त्रे स्फज्ञेटसिद्धान्तस्य प्रथमः आविष्कर्ता महाभाष्यकारो महर्षिः पतञ्जलिः' यद्यपि भगवतः पाणिनेः 'अवङ्स्फोटायनरूप' [1] इति सूत्रे स्फोटायनाचार्यस्य कस्यचलोल्लेखात् प्रतीयते यत् स्फोटायनाचार्यः स्फोट सिद्धान्तस्य प्रथमः प्रवत्र्तक आसीत्। स्फोटद्धिान्तस्य प्रवर्तनादेव स स्फोटानेति नाम्ना ख्यातिमवापेति सम्भाव्यते। परन्तु स्फोटायनाचार्यस्य कोऽपि ग्रंथ इदानीं नोपलभ्यते। पाणिनिना स्फोटसिद्धान्तोऽभिज्ञात आसीदिति सम्भावनैव नास्ति, तस्य सूत्रेषु क्वापि स्फोटशब्दस्योल्लेखाभावात्। अतः शब्दशास्त्रे स्फोटतत्त्वयाविष्कारस्य श्रेयः पञ्जलेरेव।

महर्षिः पतञ्जलिः पाणिनेः 'तपरस्तत्कालस्य' [2] इति सत्रे 'तत्कालस्य' इति पदस्य भाष्यं कुर्वत्राह- 'एवं तर्हिं स्फोटः शब्दः ध्वनिः शब्दगुणः।' एतेन प्रतीयते यद् ध्वनिरेवोच्चार्यते, न शब्दः। ध्वनयः स्फोटनामानं शब्दमणिव्यञ्जन्ति। स्फोटेनार्थः स्फुटीभवति। स्फुटत्यर्थाऽस्मादिति स्फोट इति व्युत्पतिश्च, स्वमाशयं स्फुटीकुर्वता तेन प्रोतम्-'कथम्? यथा भेर्या हन्ता भेरीमाहत्य कश्चिद्विशतिपदानि गच्छति, कश्चित्त्रिंशत् कश्चिच्चत्वारिशत् स्फोटस्तावानेव ध्वनिकृता वृद्धि।' अर्थात् स्फोटात्मकः शब्दस्तु तावानेव, वृद्धिः केवलं ध्वनिकृतैव। शब्दे चिराचिरकालप्रतीतिवैँकृतष्वनेरेव, न तु स्फोटात्मकस्य शब्दस्य। स्फोटस्याभिव्यक्तिरनन्तरं जायमानो वैकृतो ध्वनिशब्दस्य चिराचिरोपलब्धेरेव कारणमस्ति, अतः सगुणः (उपकारकः) एव। अत्र ध्वनिशब्दो वैकृतध्वनेवचिकः।

वैयाकरणानां मते ध्वनिद्विविधः- प्राकृतो वैकृतश्च। प्राकृतो ध्वनिः स्फोटस्याभिव्यक्तेः कारणम्। वैकृतो ध्वनिः स्फोटस्याभिव्यक्तेरनन्तरं, जायमानस्तस्य (स्फोटस्य) स्थितिभेदस्य, अर्थात् चिराचिरकाल पर्य तमुपलब्धेर पवा तार मन्द्र-द्रुत विलम्बितादिवृत्तिकरणं भवति। तैवॅकृतैध्वनिभिः स्फोटात्मनि भेदो न जायते।

यच्चाह भतृ हरिः-
"स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
युतिभेदे निमितत्वं बैकृतः प्रतिपद्यते।।
शब्दस्योध्वमभिव्यक्तेवृ तिभेदे तु वैकृता।।" [3]

(वाक्यपदीयम्, ब्रह्मकाण्डम्)

स्फोटस्तवभिन्नकाल एव। तत्र कालपरिमाणवृत्तिर्न। ह्नस्वर्पादिस्थले स्फोटकालस्य प्रतोतिस्तु औपचारिकी। तत्र प्राकृतस्य ध्वनेरपचारः (आरोपः) भवति। उक्तञ्च भतृ हरिणा-

'स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिना।
स्वभावतस्तु नित्यत्वाद् ह्रस्वदीर्धप्लुतादिषु।। [4]
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।
अरूपे महति पर काले स्फोटकालो न भिद्यते।।"

(वाक्य. ब्र. का.)-75

अर्थात् शब्दस्य (स्फोटस्य) नित्यवयाऽभिन्नकालस्य ह्रस्वदोर्षादिषु प्राकृतध्वनेः कालः तारत्वादिः हेतुरूपचर्यते।
शब्दतत्वस्य महान् विवेचको महावेयाकरणो भतृ हरिः स्फोट ध्वनिश्च परिभाषामाणो ब्रूते-

'यः संयोगवियोगाभ्यां करणैरूपजन्यते।
स स्फोटः, शब्दजाः शब्दा ध्वनयोऽन्यैरूदाहृताः।। [5]

(वा.ब्र.का.)-102

अर्थात् संयोग-वियोगकारणाभ्यां कण्ठताल्वादिस्थानरूपैः करणेर्यः शब्द उपजायते (तत्तस्थाननिष्ठजिह्वग्रादिसंयोगवियोगहुतुक उत्पद्यते) स शब्दः स्फोटः। शब्दः प्राथमिकः स्फोटः। ततश्च वीचीसन्तानवत् श्रोत्रुमुपगच्छन्तः शब्दजाः शब्दा अन्येः (शब्दोत्पत्ति वादिभि) ध्वनयः कथिताः।
यद्यपि स्फोटशब्दो वेयाकरणानां नये नित्यस्तथाप्पत्र तत्यस्यापि स्फोटस्योत्पत्ति स्वीकुर्वता भतृहरिणा एका नवीना विचारधारा समुपस्थापिता।
अत्र 'करणैरूपजन्यते' इत्यत्रोपजन्यत इत्यस्याभिव्यज्यते प्रकाश्यते वेत्यर्थः सम्भवतो भ्रतृहरेरभिमतः।
वंयाकरणानां मतानुसारं ध्वनिनाभिव्यक्त, ध्वनौ विनष्टेऽप्यर्थस्य बोधकः एव वास्तविकः शब्दः, स एव कम्बुग्रीवादिमद्व्यक्तेवचिकः, स च निस्यः। स न तूत्पद्यने, न वा विनश्यति। केवलमसी ध्वनिरूपोऽभिव्यक्तो भवति ।
इदमेव स्फोटतत्त्वम्, वाक्तत्वम्, शब्दतत्वं शब्दब्रह्मत्यादिशब्दैर्व्यपदिश्यते स एव शब्दब्रह्मरूपः स्फोटस्वरूपः शब्दः पराशक्तिः परावागित्यादिशब्दैर्व्यवह्त्रियते। समस्ता वर्णसमूहाः शब्दाः, समरतं वाङ्मयं जगच्च तग्यैव स्फोटात्मकरय शब्दस्याधवा पराख्यवाचः सृष्टिः।
समस्तवाङ्मयग्वरूपः शब्दब्रह्मस्फोटः प्रथमं मूलचक्रे (मूलाधारे) अभिव्यक्तो भवति। मूलचक्रे स्थितेयं वाक् परावाक् कथ्यते। सैव परावाक् प्राणवायोः साहम्येन तेन वायुना सहोध्र्वमुत्यिता नाभिदेशेऽभिव्यक्ता पश्यन्ती निगद्यते।सा च प्राणवायोः साह्य्येनोर्ध्वमुत्यिता ह्नद्देशेऽभिव्यक्ता मध्यमा कथ्यते। सैव मुखं प्राप्य कण्ठाताल्वादिस्थानेष्वभिव्यज्यमाना श्रवणविषयोभूता बंखरो वाणी कथ्यते। यथोक्तं भतृं हरिणा-

'परावाङ् मूलचक्रस्था पङयन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया बैखरी कण्ठदेशमा।। [6]

(वा.प.का.)

'चत्वारि वाक्परिमिता पदानि', चत्वारि श्रृङ्गस्त्रोऽस्य पादाः' इत्यादि यजुर्वेदीयसूक्तानं' महाभाष्यं कुर्वता पतञ्जलिना तट्टीकाकारेण केयटेन 'नामारूयातोपसर्गनिपात्ताश्च' इत्यत्र 'च' शब्देन क्ष्यमाणं परा पश्यन्तीत्यादिरूपं प्रकारान्तरं सूचितम्' इति ब्रुवता व च उपर्युक्तं चातुबिध्यं प्रतिपादित्तम् अत्र 'गुहात्रोणि नेङ्गयन्ति','तुरीयां वाचं मनुष्या वदन्ति'इत्यस्य भष्ये तस्य टीकायां च पतञ्जलि कैयटाभ्यां स्पष्टीकृतं यत् परा पश्यन्तो मध्यमेति वक्त्रयं क्रमणः मूलाधार-नाभि-हृदयरूपासु गुहासु निहितमस्ति। अतो वाक्त्रयमिदं साधारणमनुष्याणामगम्यमस्ति। तत्तु योगिनां महर्षीणामेव गम्यमस्ति। 'तुरोयां वाचम्' अर्थाद्वैखरीं वाचं साधारणमनुष्या वदन्ति।
बैखरी वाणी अर्थाववोधिका न। वैखर्या यो नादः क्रियते स केवलमन्येषां श्रवणगं चरो भवति। हृदि स्थितया मध्यमया वाण्या यो नादो विधीयते तेनैव स्फोटो ब्यज्यते, येन शाब्दबोधो जायते। यथाह भतृंहरिः-

"वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।" [7] (बा.,ब्र.का.)

तात्पर्यमिदं यदस्ममिर्या बैखरी वाणो उच्चार्यते साऽर्थं न बोधयति। सा तु श्रोतृणां कर्णंकुहरं प्रविश्य तत्रस्थां मध्यमा वाणीं प्रचोधयति। ततस्तत्र स्थितो व्यापकः स्फोटोऽभिव्यपज्यते। मध्यमा वाणी सर्वत्र व्यापिका। अत एव बालवृद्ध-मूक-वधिरादोनामपि प्रयत्नद्वारा शब्दार्थबोधः कार्यते। बैखर्या वा.या उच्चारणं विनापि केवलं चेष्टा-लेखादि द्वारापि मध्यमायां स्थितस्य स्फोटत्मकशब्दस्याभिव्यक्तिर्भवति।
महाभाष्यकारेण शब्दानुशासने 'अथ गौरित्यत्र कः शब्दः इति प्रश्नमुपस्थापयता स्वयमेवोत्तरितम् 'येनोच्चारितेन सास्नालाङ्गू ककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इति। अनया महाभाष्योवत्या प्रतीयते यद् यस्चोच्चारणं भवति स शब्दः, स एवार्थस्य वाचकः। इत्यमुच्चरितशब्दस्येव स्फाटत्व सिद्ध्यति। स्फोटस्योच्चारणाभावादियं महाभाष्योक्तिश्चासंगता भवति। महाभाष्यकारस्थाशयमजानतां स्फोटविरोधिनामाशङ्कामिमां निराकर्तुं महाभाष्यटीकाकारेण केयटेन स्पष्टं प्रोक्तं यदत्रोच्चारितेनेत्यस्या शयोऽस्ति 'प्रकाशितेन' अर्थादुच्चारणक्रियवाऽभिव्यक्तेनेति। कैपटेन 'स्फोटो नादाभिव्यङ्गयो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः' इत्यपि सूचितं तत्र।'प्रकाशितेन' इत्यरूप टिप्पव्यामुद्योतकारेण नागे शेन लिखितम् 'अभिव्यञ्जकैरिति।' उच्चारणक्रियया अर्थात् वैखर्या वाक्या मध्यमायां स्थितः स्फोटात्मकः शब्दोऽभिव्यज्यते। इत्यमुच्चार्यमाकात् शब्दादभिव्यक्त स्फोटात्मकः शब्द एवार्थस्य वाचक इति प्रदीपोद्योत कारयोरभिप्रायः। गौरिति शब्दे उच्चार्यमाणा गकारौकारविसर्जनीया अर्थ न प्रत्याययन्ति, किन्तु वैध्वनिभिरभिव्यक्तः स्फोटात्मकः शब्द एवार्थस्य प्रत्यायकः।
सारांशोऽयं यत् स्फोटो नित्यो व्यापकश्च। स नानाप्रकारैध्वनिभिरभि यक्तः प्रकटो भवति तथा च यदा स पूर्वपूर्ववर्णानां संस्कारैर्युक्तोऽन्तिमवर्णोऽनिव्यक्तो भवति तदाऽसावर्थबोधं करोति। भर्तृं हरिणाऽप्युक्तम्-

"नादेनाहितबीजायामन्त्येन ध्वनिना सह
आवृत्तिपरिपाकायां बुद्धो शब्दोऽवधार्यते।।" [8]

अर्थात् पूर्वपूर्वध्वनिभिः शब्दस्वरूपतावधारणयोग्यतापादकसंस्कारः ततोऽन्त्यो ध्वनिः पूर्वपूर्व संस्कारसहकृतायामावृत्तिलाभप्राप्नयोग्यतापरिपाकाया बुद्धौ शब्दस्वरूपं

सन्निवेणयति। 'अइउण्' इति सूत्रे महाभाष्यकारेण तथा तट्टीकाकाराभ्यां केपटनागेशाभ्यामपीदं प्रतिपादितम्। वाचस्पत्येऽपि लिखितम् 'पूर्वपूर्ववर्णानुभवसहित चरण वर्णानु मवव्यङ्ग्यः अर्थप्रत्यायकः अखण्ड शब्दभेदः फोटः' तात्पर्यमिदं यद् वर्णा द्विक्षणस्थायिनो भवन्ति। तथापि विनष्टैः पूर्वपूर्ववर्णैरिकः संस्कार उत्पद्यते। स्थायिनस्तस्य संस्कारस्याप वर्णसंस्कारेण सहयोगो भवति। एवं घट पाटादिशब्दानां समेषां वर्णानां सामूहिकः संस्कारोऽन्तिमवर्णे सन्निहितो भवति, येनेयं सामूहिकी भावना घटपटद्यर्थानामभिव्यञ्जका भवति।

एष उच्चरितप्रध्वंसिवर्णानां पोर्वापर्यव्यवहारो बुद्धिस्य एव। यथाह महर्षिपतञ्जलिः 'पर. सन्निकर्षः संहिता' इति सूत्रस्ये महाभाष्ये- 'बुद्धिविषयमेव शब्दानां पौर्वापर्यम्'.........इत्यादि। शब्दा इवार्था अपि बुद्धिस्था एव।

स्तुतः, आशुविनाशिनां क्रमिकाणां वर्णानां मेलकाभावान् आनुपूर्व्याः ज्ञातुमशक्यत्वात् शब्दात् (क्षणिकात्) कथमर्थबोध'। तस्मात् पूव्रपूर्ववर्णानुभवजनितसंस्कारसहितान्तिमवर्णानुभवेन स्फोटा व्यज्यते। स च स्फोटरूपो ध्वन्यात्मकः (व्यङ्ग्यात्मकः) शब्दो नित्यो ब्रह्मस्वरूपः सकलप्रत्येयप्रत्यायनक्षमोऽङंगाक्रियते। यथाह् भतृ हरिः-

> 'अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
> विवतंतेऽर्थभावेन प्रक्रियाजगतो यतः।। [9] (वा., ब्र. का. 1)

तस्य च स्फोटरूपस्य शब्दस्य व्यञ्जको वर्णात्मकः शब्दः। स च ध्यञ्जकः शब्दो वैरूाकरणैः (ध्वनतीति ध्निरिति व्युत्पत्या) ध्वनिः कथ्यते। तैध्र्वनिभिः (श्रोतुः कर्णकुहरे पतितैः) अभिव्यज्यमानः फोटात्मक एव शब्दोऽर्थ प्र याययतिः न तु प्रत्येकमुच्चार्यमाणा वणा्र अर्थप्रत्यायका इति वैयाकरणानां सिद्धान्तः।

स्फोटस्य भेदोपभेदानां तेषामखण्डत्व-सखण्डत्वादीनाञ्च विवेचनं ग्रन्थगोरवभिया नेह प्रतन्वते। विस्तरस्त्वन्यत्र सन्दर्भग्रनन्थेषु द्रष्टव्यः।

वैयाकरणान स्फोटवाद एष मीमांसा- न्याय सांख्या-वेदान्तदार्शनिकानां नाभिमतः। तेषामत्र विप्रतिपत्तिः महामहिममीमांसकेन कुमारिलभट्टेन स्वीये श्लोकवार्तिके-

> "वादन्तो यादृशा ये च पदार्थप्रतिपादने।
> वर्णा विज्ञातसामथ्र्यास्ते तथैवावभासकाः।।(68)

इत्याद्युक्तवता वर्णानां वाचकत्वमङ्गीकृत्य स्फोटकल्पनाया अनावश्यकत्वं प्रतिपादितम्। तस्य मते यावन्तो वर्णा येन क्रमेणार्थप्रतिपादने ज्ञातसामथ्र्याः सन्ति ते तेनैव क्रमेणार्थबोधकाः। एकस्या,स्मृतेविषयीभूता एव वर्णा अर्थबोधका भवन्ति। अस्यां स्थितौ न वर्णः प्रत्येकमर्यबोधकः, किन्तु यावन्तो वर्णो यदर्ष प्रदिपादनसमर्थास्तावत्सु वर्णेषु बोधकत्वशक्तिनिहितेत्यर्थः।

**सन्दर्भा : -**


1. पाणिनीयसूत्रम् - 6/1/1/123
2. पाणिनीयसूत्रम् -1/1/70
3. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-
4. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-
5. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-
6. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-
7. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-
8. वाक्यपदीपे
9. वाक्यपदीय ब्रह्मकाण्डे कारिका संख्या-